Postal Regd.No. GAMC- 1553/2016-2018 ISSN 2454-6313

# संस्कृत - साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १३ अङ्क : १४९
ऑक्टोबर - २०१८

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2016-2018 issued by SSP Ahmedabad. Valid upto 31-12-2018. containing 8 pages ₹ 10

## चिन्तनम्

### वक्रता

कस्मिंश्चित् सभागृहे कर्णप्रियं प्रवचनं प्रवर्तते। तत् आस्वादयन्तः श्रोतारः अपि निमग्नहृदयाः सन्ति। अत्रान्तरे कश्चित् मूर्खः सभागृहं प्रविशति। विलम्बेन आगमनं कोऽपि अक्षम्यः अपराधः नास्ति, किन्तु उपविष्टान् सर्वान् जनान् अतिक्रम्य कृतं लयच्छेदकं वर्तनं, धृष्टतायाः प्रदर्शनम् अस्ति। विलम्बेन प्रविष्टः बुद्धिमान् श्रोता, सभायाः अपराधी इव गुप्तम् उपविशति। तत् श्रोतुः चारित्र्यस्य विपाकः अस्ति।

केचन दुर्मुखाः मनुष्याः प्रतिपदं वचनभङ्गं कुर्वन्ति। अस्मिन् काले अहम् अत्र मेलिष्यामि इति वचनं दत्त्वा, शिक्षिताः जनाः अपि चिरप्रतीक्षां कारयन्ति। तथैव खलु ऋणेन स्वीकृतस्य धनस्य काले प्रत्यर्पणम् अपि अस्माकं पारमार्थिकं कर्तव्यम् अस्ति। परन्तु धनस्य स्वीकरणे नम्रतां गतः मनुष्यः, तस्य प्रत्यर्पणे मूर्च्छां भजते। अर्थकृच्छ्रे ऋणी वक्तुम् अर्हति यत् अहं विवशः अस्मि। अवसरं प्राप्य ऋणशोधनं करिष्यामि। एवं मनुष्यस्य गौरवं रक्ष्यते। परन्तु यथेष्टं धनव्ययं कुर्वन्, सुखेन शयानः ऋणी अविवेकी अस्ति।

केचन तीक्ष्णकर्णाः मनुष्याः परकथासु दृढां रुचिं धारयन्ति। कस्यचित् जीवने विना आमन्त्रणं दृष्टिपातः (अथवा कर्णपातः !) वस्तुतः चित्तवृत्तेः मालिन्यम् अस्ति। तत्रापि युवतीनां छिद्रवार्त्तासु श्रोत्रेन्द्रियं स्वीयं चारित्र्यं विस्मरति।

केचन परगृहप्रवेशपटवः जनाः कस्यचित् गृहं गत्वा सुखासने हठात् उपविशन्ति। पुरतः उपविष्टः गृहस्थः विलम्बस्य कियद्भारं सोढुं समर्थः अस्ति इति अविचार्य, वृथा प्रलापेन समग्रं कुटुम्बं त्रासयन्तः मूर्खाः अस्माकं समाजे निःशुल्कं लभ्यन्ते। रात्रौ समागतः उत्तमः अतिथिः गृहस्थस्य विवेकं, गृहिण्याः धैर्यं, बालकानां निद्राकालं च ज्ञात्वा उचिते काले गृहात् निःसरति। कुटुम्बस्य मुखे विलसन्ती प्रसन्नता एव अतिथेः आगमनस्य गमनस्य वा सौन्दर्यम् अस्ति।

मयूरस्य ग्रीवा वक्रा अस्ति। उष्ट्रस्य अपि ग्रीवा वक्रा अस्ति। परन्तु उभयोः वक्रता भिन्नता अस्ति। केषुचित् स्थानेषु वक्रता शोभते। कृष्णस्य वक्रता 'लीला' नाम्ना प्रसिद्धा अभवत्। अपरपक्षे दुर्योधनस्य वक्रता महतः संहारस्य कारणम् अभवत्। वयम् अपि आत्मनिरीक्षणेन ज्ञातुं शक्नुमः यत् अस्मासु विद्यमाना वक्रता कृष्णप्रिया अस्ति, दुर्योधनप्रिया वा ?

**अर्थकृच्छ्रम् - धन का संकट** ✍ **सतीशः गज्जर**

# अस्माकम् आगामिकार्यक्रमाः

## भविष्यति दीपावलीवर्गः......

( वर्गस्य दिनाङ्कः - १०-११-१८ सः १८-११-१८ )

**बालसंस्कृतशिबिरम्** (Class 9)

10:00am to 11:30am

**बालसंस्कारकेन्द्रम्** (Class 1 to 8)

10:00am to 11:30am

**मार्गदर्शनम्** ( व्याकरणम् ) (Class 10)

8:00am to 9:30am

**Venue:**
Core House, Off CG Road, Ah'bad

**Contact :**
Dr. Mihir Upadhyay - (91) 098246 16237

## संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

EKLAVYA SANSKRIT ACADEMY

## संस्कृत-गरबा

*निमन्त्रणम्*

मान्याः,

एकलव्य-संस्कृत-एकेडेमी एवं गुजरात-साहित्य-अकादमी, गान्धिनगरम् इत्यनयोः संयुक्तोपक्रमेण आयोजिते संस्कृतगरबाकार्यक्रमे भवतां हार्दं स्वागतम् अस्ति ।

दिनाङ्कः - १४-१०-२०१८ रविवासरः,
समयः - रात्रौ - ८.०० वादने आरम्भः

स्थलम् - कोरहाउस, अपोलोसिटी सेन्टर होस्पिटल समीपे, परिमलगार्डनमार्गः, एलिसब्रिज, अहमदाबाद-३८०००६

### ( संस्कृत-गरबागीतम् )

**मोदयामि**

राधे ! अमदावादे नगरे शीघ्रं समागच्छ रे लोल,
राधे ! रासलीला रमणीया दिव्या योजिता रे लोल ॥
भद्रे ! भद्रे वातावरणे भद्रास्सम्मिलिता रे लोल
सर्वे संस्कृतसेवाप्रीत्या राष्ट्रं पूजयन्ति लोल;
वंशीनादं कृत्वा धन्यान् मोदयामि लोल.....
राधे ! अमदावादे नगरे शीघ्रं.....॥

सौम्ये ! संस्कृतेन संपुष्टास्सर्वे गायन्ति रे लोल,
राधे ! सान्निध्यं दृष्ट्वा ते तुष्टास्संभवेयुः लोल;
वंशीनादं कृत्वा धन्याम् मोदयामि लोल
राधे ! अमदावादे नगरे शीघ्रं.....॥

डॉ. वासुदेवः वि. पाठकः 'वागर्थः'

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006